श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## उद्धव गीता - प्रथम सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्

नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्

॥ ॐ नमो भगवते वासुदेवाय ॥
एकादशः स्कंधः
॥ अथ षष्ठोऽध्यायः ॥

श्रीशुक उवाच
अथ ब्रह्माऽऽत्मजैर्देवैः(फ्), प्रजेशैरावृतोऽभ्यगात्।
भवश्च भूतभव्येशो, ययौ भूतगणैर्वृतः॥ 1॥
ब्रह्माऽऽत्म+ जैर्+ देवैः, प्रजेशैरा+ वृतोऽभ्यगात्, भूत+ भव्येशो, भूतगणैर्+ वृतः

इन्द्रो मरुद्भिर्भगवा-नादित्या वसवोऽश्विनौ।
ऋभवोऽङ्गिरसो रुद्रा, विश्वे साध्याश्च देवताः॥ 2॥

मरुद्+ भिर्+ भगवा, ऋभवोऽङ्+ गिरसो

गन्धर्वाप्सरसो नागाः(स्), सिद्धचारणगुह्यकाः।
ऋषयः(फ्) पितरश्चैव, सविद्याधरकिन्नराः॥ 3॥

गन्धर्वाप्+ सरसो, सिद्ध+ चारण+ गुह्यकाः, सविद्या+ धर+ किन्नराः

द्वारकामुपसं(ञ्)जग्मुः(स्), सर्वे कृष्णदिदृक्षवः।
वपुषा येन भगवान्, नरलोकमनोरमः।
यशो वितेने लोकेषु, सर्वलोकमलापहम्॥ 4॥

द्वारका+ मुप+ सं(ञ्)जग्मुः(स्), कृष्णदि+ दृक्षवः, नर+ लोक+ मनोरमः, सर्वलो+ कमला+ पहम्

तस्यां(म्) विभ्राजमानायां(म्), समृद्धायां(म्) महर्द्धिभिः।
व्यचक्षतावितृप्ताक्षाः(ख्), कृष्णमद्भुतदर्शनम्॥ 5॥

विभ्रा+ जमा+ नायां(म्), महर्द्+ धिभिः, व्यचक्षता+ वितृप्+ ताक्षाः(ख्), कृष्ण+ मद्+ भुतदर्शनम्

स्वर्गोद्यानोपगैर्माल्यैश्- छादयन्तो यदूत्तमम्।
गीर्भिश्चित्रपदार्थाभिस्- तुष्टुवुर्जगदीश्वरम्॥ 6॥

स्वर्गो+ द्यानो+ पगैर्+ माल्यैश्, यदूत्+ तमम्

गीर्+ भिश्+ चित्र+ पदार्था+ भिस्, तुष्टुवुर्+ जगदीश्वरम्

**देवा ऊचुः**

नताः(स्) स्म ते नाथ पदारविन्दं(म्),
बुद्धीन्द्रियप्राणमनोवचोभिः।
यच्चिन्त्यतेऽन्तर्हृदि भावयुक्तैर्-
मुमुक्षुभिः(ख्) कर्ममयोरुपाशात्॥ 7॥

बुद्धीन्द्रिय+ प्राण+ मनो+ वचोभिः, यच्+ चिन्त्यतेऽन्तर्+ हृदि, कर्म+ मयो+ रुपाशात्

त्वं(म्) मायया त्रिगुणयाऽऽत्मनि दुर्विभाव्यं(म्),
व्यक्तं सृजस्यवसि लुम्पसि तद्गुणस्थः।
नैतैर्भवानजित कर्मभिरज्यते वै,
यत् स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः॥ 8॥

दुर्+ विभाव्यं(म्), सृजस्+ यवसि, नैतैर्+ भवान+ जित,
कर्म+ भिरज्यते, सुखेऽ+ व्यवहितेऽ+ भिरतोऽ+ नवद्यः

शुद्धिर्नृणां(न्) न तु तथेड्य दुराशयानां(म्),
विद्याश्रुताध्ययनदानतपः(ख्)क्रियाभिः।
सत्त्वात्मनामृषभ ते यशसि प्रवृद्ध-
सच्छ्रद्धया श्रवणसम्भृतया यथा स्यात्॥ 9॥

शुद्धिर्+ नृणां(न्),विद्या+ श्रुता+ ध्ययन+ दानतपः(ख्)
सत्त्वात्+ मना+ मृषभ, श्रवण+ सम्+ भृतया

स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः(ह्),
क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः।
यः(स्) सात्वतैः(स्) समविभूतय आत्मवद्भिर्-
व्यूहेऽर्चितः(स्) सवनशः(स्) स्वरतिक्रमाय॥ 10॥

स्यान्+ नस्तवाङ्घ्रि+ रशुभा+ शय+ धूमकेतुः(ह्)
मुनिभि+ रार्द्र+ हृदोह्+ यमानः,स्व+ रति+ क्रमाय

यश्चिन्त्यते प्रयतपाणिभिरध्वराग्नौ,
त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा।
अध्यात्मयोग उत योगिभिरात्ममायां(ञ्),
जिज्ञासुभिः(फ्) परमभागवतैः(फ्) परीष्टः॥ 11॥

यश्+ चिन्त्यते, प्रयत+ पाणि+ भिर+ ध्वराग्नौ, निरुक्त+ विधिनेश
योगि+ भिरात्म+ मायां(ञ्),परम+ भागवतैः(फ्)

**पर्युष्टया तव विभो वनमालयेयं(म्),**

**सं(व्)स्पर्धिनी भगवती प्रतिपत्निवच्छ्रीः।**

**यः(स्) सुप्रणीतममुयार्हणमाददन्नो,**

**भूयात् सदाङ्घ्रिरशुभाशयधूमकेतुः॥ 12॥**

वनमा + लयेयं(म्),प्रति+ पत्नि+ वच्छ्रीः, सुप्रणीत+ ममुयार् + हणमा+ ददन्नो

सदाङ्+ घ्रिरशुभा+ शय+ धूमकेतुः

**केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको,**

**यस्ते भयाभयकरोऽसुरदेवचम्वोः।**

**स्वर्गाय साधुषु खलेष्वितराय भूमन्,**

**पादः(फ्) पुनातु भगवन् भजतामघं(न्) नः॥ 13॥**

केतुस्त्रि+ विक्रम+ युतस्त्रि+ पतत्+ पताको

भया+ भयकरोऽ+ सुरदेव+ चम्वोः, खलेष्+ वितराय,भजता+ मघं(न्)

**नस्योतगाव इव यस्य वशे भवन्ति,**

**ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः।**

**कालस्य ते प्रकृतिपूरुषयोः(फ्) परस्य,**

**शं(न्) नस्तनोतु चरणः(फ्) पुरुषोत्तमस्य॥ 14॥**

नस्यो+ तगाव, ब्रह्मा+ दयस्+ तनुभृतो, मिथुरर्+ द्यमानाः

प्रकृतिपू+ रुषयोः(फ्), पुरुषोत् + तमस्य

**अस्यासि हेतुरुदयस्थितिसंयमाना-**

**मव्यक्तजीवमहतामपि कालमाहुः।**

**सोऽयं(न्) त्रिणाभिरखिलापचये प्रवृत्तः(ख्),**

**कालो गभीररय उत्तमपूरुषस्त्वम्॥ 15॥**

हेतुरुदय+ स्थितिसं(य्)य+ माना, मव्यक्त+ जीव+ महता+ मपि

त्रिणा+ भिरखिला+ पचये, उत्तमपू+ रुषस्+ त्वम्

त्वत्तः(फ्) पुमान् समधिगम्य यया स्ववीर्यं(न्),
धत्ते महान्तमिव गर्भममोघवीर्यः।
सोऽयं(न्) तयानुगत आत्मन आण्डकोशं(म्),
हैमं (म्) ससर्ज बहिरावरणैरुपेतम्॥ 16॥

गर्भ+ ममोघ+ वीर्यः, बहिरा+ वरणै+ रुपेतम्

तत्तस्थुषश्च जगतश्च भवानधीशो,
यन्माययोत्थगुणविक्रिययोपनीतान्।
अर्थां(ञ्)जुषन्नपि हृषीकपते न लिप्तो,
येऽन्ये स्वतः(फ्) परिहृतादपि बिभ्यति स्म॥ 17॥

तत्+ तस्थु+ षश्च, यन्+ माययोत्थ+ गुण+ विक्रियया+ पनीतान्

अर्थां(ञ्)+ जुषन् +नपि, परिहृता+ दपि

स्मायावलोकलवदर्शितभावहारि-
भ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः।
पत्न्यस्तु षोडशसहस्रमनं(ङ्)गबाणैर्-
यस्येन्द्रियं(म्) विमथितुं(ङ्) करणैर्न विभ्व्यः॥ 18॥

स्माया+ वलोक+ लवदर्+ शित+ भावहारि, भ्रूमण्डल+ प्रहितसौ+ रतमन्त्र+ शौण्डैः

षोडश+ सहस्+स्रमनं(ङ्)+ गबाणैर्

विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः(फ्),
पादावनेजसरितः(श्) शमलानि हन्तुम्।
आनुश्रवं(म्) श्रुतिभिरङ्घ्रिजमङ्गसङ्गैस्-
तीर्थद्वयं(म्) शुचिषदस्त उपस्पृशन्ति॥ 19॥

विभ्व्यस्+ तवा+ मृतकथो+ दवहास्त्रि+ लोक्याः(फ्), पादा+ वने+ जसरितः(श्)

श्रुतिभिरङ्+ घ्रिजम(ङ्)+ गसङ्गैस्, तीर्थद्+ वयं(म्)

**बादरायणिरुवाच**

**इत्यभिष्टूय विबुधैः(स्), सेशः(श्) शतधृतिर्हरिम्।**
**अभ्यभाषत गोविन्दं(म्), प्रणम्याम्बरमाश्रितः॥ 20॥**

इत्यभिष्+ टूय, शत+ धृतिर्+ हरिम्, प्रणम्याम्बर+ माश्रितः

**ब्रह्मोवाच**

**भूमेर्भारावताराय, पुरा विज्ञापितः(फ्) प्रभो।**
**त्वमस्माभिरशेषात्मं(व्)स्-तत्तथैवोपपादितम्॥ 21॥**

भूमेर्+ भारा+ वताराय, त्वमस्मा+ भिर+ शेषात्+ मं(व्)स्, तत्+ तथैवो+ पपादितम्

**धर्मश्च स्थापितः(स्) सत्सु, सत्यसन्धेषु वै त्वया।**
**कीर्तिश्च दिक्षु विक्षिप्ता, सर्वलोकमलापहा॥ 22॥**

सत्य+ सन्धेषु, सर्वलो+ कमला+ पहा

**अवतीर्य यदोर्वं(व्)शे, बिभ्रद् रूपमनुत्तमम्।**
**कर्माण्युद्दामवृत्तानि, हिताय जगतोऽकृथाः॥ 23॥**

रूप+ मनुत्तमम्, कर्माण्युद्+ दामवृत्तानि

**यानि ते चरितानीश, मनुष्याः(स्) साधवः(ख्) कलौ।**
**श‍ृण्वन्तः(ख्) कीर्तयन्तश्च, तरिष्यन्त्यञ्जसा तमः॥ 24॥**

कीर्तयन्+ तश्च, तरिष्+ यन्त्यञ्+ जसा

**यदुवं(व्)शेऽवतीर्णस्य, भवतः(फ्) पुरुषोत्तम।**
**शरच्छतं(म्) व्यतीयाय, पं(ञ्)चविं(व्)शाधिकं(म्) प्रभो॥ 25॥**

यदुवं(व्)शेऽ+ वतीर्णस्य, पं(ञ्)च+ विं(व्)शा+ धिकं(म्)

**नाधुना तेऽखिलाधार, देवकार्यावशेषितम्।**
**कुलं(ञ्) च विप्रशापेन, नष्टप्रायमभूदिदम्॥ 26॥**

देव+ कार्या+ वशेषितम्, नष्ट+ प्राय+ मभूदिदम्

ततः(स्) स्वधाम परमं(म्), विशस्व यदि मन्यसे।
सलोकाँल्लोकपालान् नः(फ्), पाहि वैकुण्ठ किं(ङ्)करान्॥ 27॥

सलोकाँल्+ लोक+ पालान्

**श्रीभगवानुवाच**

अवधारितमेतन्मे, यदात्थ विबुधेश्वर।
कृतं(म्) वः(ख्) कार्यमखिलं(म्), भूमेर्भारोऽवतारितः॥ 28॥

अवधा+ रितमे+ तन्मे, भूमेर्+ भारोऽ+ वतारितः

तदिदं(म्) यादवकुलं(म्), वीर्यशौर्यश्रियोद्धतम्।
लोकं(ञ्) जिघृक्षद् रुद्धं(म्) मे, वेलयेव महार्णवः॥ 29॥

वीर्य+ शौर्य+ श्रियोद्+ धतम्

यद्यसं(व्)हृत्य दृप्तानां(म्), यदूनां(म्) विपुलं(ङ्) कुलम्।
गन्तास्म्यनेन लोकोऽय-मुद्वेलेन विनङ्क्ष्यति॥ 30॥

यद्य+ सं(व्)हृत्य, गन्तास्+ म्यनेन, मुद्+ वेलेन

इदानीं(न्) नाश आरब्धः(ख्), कुलस्य द्विजशापतः।
यास्यामि भवनं(म्) ब्रह्मन् -नेतदन्ते तवानघ॥ 31॥

**श्रीशुक उवाच**

इत्युक्तो लोकनाथेन, स्वयम्भूः(फ्) प्रणिपत्य तम्।
सह देवगणैर्देवः(स्), स्वधाम समपद्यत॥ 32॥

देव+ गणैर्+ देवः(स्)

अथ तस्यां(म्) महोत्पातान्, द्वारवत्यां(म्) समुत्थितान्।
विलोक्य भगवानाह, यदुवृद्धान् समागतान्॥ 33॥

महोत्+ पातान्, द्वार+ वत्यां(म्), यदु+ वृद्धान्

**श्रीभगवानुवाच**

**एते वै सुमहोत्पाता, व्युत्तिष्ठन्तीह सर्वतः।**

**शापश्च नः(ख्) कुलस्यासीद्, ब्राह्मणेभ्यो दुरत्ययः॥ 34॥**

सुमहोत्+ पाता, व्युत्+ तिष्ठन्+ तीह, कुलस्या+ सीद्

**न वस्तव्यमिहास्माभिर्-जिजीविषुभिरार्यकाः।**

**प्रभासं(म्) सुमहत्पुण्यं(म्), यास्यामोऽद्यैव मा चिरम्॥ 35॥**

वस्तव्य+ मिहास्+ माभिर्+ जिजी+ विषुभि+ रार्यकाः

सुमहत्+ पुण्यं(म्), यास्यामोऽ+ द्यैव

**यत्र स्नात्वा दक्षशापाद्, गृहीतो यक्ष्मणोडुराट्।**

**विमुक्तः(ख्) किल्बिषात् सद्यो, भेजे भूयः(ख्) कलोदयम्॥ 36॥**

यक्ष्मणो+ डुराट्

**वयं(ञ्) च तस्मिन्नाप्लुत्य, तर्पयित्वा पितॄन् सुरान्।**

**भोजयित्वोशिजो विप्रान्, नानागुणवतान्धसा॥ 37॥**

तस्मिन्+ नाप्लुत्य, भोजयित्वो+ शिजो, नाना+ गुण+ वतान्धसा

**तेषु दानानि पात्रेषु, श्रद्धयोप्त्वा महान्ति वै।**

**वृजिनानि तरिष्यामो, दानैर्नौभिरिवार्णवम्॥ 38॥**

श्रद्ध+ योप्त्वा, दानैर्+ नौभि+ रिवार्+ णवम्,

**श्रीशुक उवाच**

**एवं(म्) भगवताऽऽदिष्टा, यादवाः(ख्) कुलनन्दन।**

**गन्तुं(ङ्) कृतधियस्तीर्थं(म्), स्यन्दनान् समयूयुजन्॥ 39॥**

कृत+ धियस्+ तीर्थं(म्), समयू+ युजन्

**तन्निरीक्ष्योद्धवो राजन्, श्रुत्वा भगवतोदितम्।**

**दृष्ट्वारिष्टानि घोराणि, नित्यं(ङ्) कृष्णमनुव्रतः॥ 40॥**

तन्+ निरीक्ष्योद्+ धवो, भगवतो+ दितम्, दृष्ट्वा+ रिष्टानि, कृष्ण+ मनुव्रतः

विविक्त उपसं(ङ्)गम्य, जगतामीश्वरेश्वरम्।
प्रणम्य शिरिसा पादौ, प्रां(ञ्)जलिस्तमभाषत॥ 41॥

जगता+ मीश्+ वरेश्+ वरम्, प्रां(ञ्)जलिस्+ तम+ भाषत

उद्धव उवाच

देवदेवेश योगेश, पुण्यश्रवणकीर्तन।
सं(व्)हृत्यैतत् कुलं(न्) नूनं(म्), लोकं(म्) सन्त्यक्ष्यते भवान्।
विप्रशापं(म्) समर्थोऽपि, प्रत्यहन्न यदीश्वरः॥ 42॥

पुण्य+ श्रवण+ कीर्तन, सं(व्)हृत्यै+ तत्, सन्+ त्यक्ष्यते, प्रत्यहन्+ न

नाहं(न्) तवाङ्घ्रिकमलं(ङ्), क्षणार्धमपि केशव।
त्यक्तुं(म्) समुत्सहे नाथ, स्वधाम नय मामपि॥ 43॥

तवाङ्घ्रि+ कमलं(ङ्), क्षणार्+ धमपि

तव विक्रीडितं(ङ्) कृष्ण, नृणां(म्) परममङ्गलम्।
कर्णपीयूषमास्वाद्य, त्यजन्त्यन्यस्पृहां(ञ्) जनः॥ 44॥

कर्ण+ पीयू+ षमास्+ वाद्य, त्यजन्त्यन्+ यस्पृहां(ञ्)

शय्यासनाटनस्थानस्-नानक्रीडाशनादिषु।
कथं(न्) त्वां(म्) प्रियमात्मानं(म्), वयं(म्) भक्तास्त्यजेमहि॥ 45॥

शय्या+ सना+ टनस्+ थानस्+ नान+ क्रीडा+ शनादिषु, भक्तास्+ त्यजेमहि

त्वयोपभुक्तस्रग्गन्ध-वासोऽलङ्कारचर्चिताः।
उच्छिष्टभोजिनो दासास्-तव मायां(ञ्) जयेमहि॥ 46॥

त्वयोप+ भुक्तस्+ रग्+ गन्ध, वासोऽ+ लङ्कार+ चर्चिताः, उच्छिष्ट+ भोजिनो

वातरशना य ऋषयः(श्), श्रमणा ऊर्ध्वमन्थिनः।
ब्रह्माख्यं(न्) धाम ते यान्ति, शान्ताः(स्) सं(न्)न्यासिनोऽमलाः॥ 47॥

ऊर्ध्व+ मन्थिनः, सं(न्)न्या+ सिनोऽ+ मलाः

**वयं(न्) त्विह महायोगिन्, भ्रमन्तः(ख्) कर्मवर्त्मसु।**
**त्वद्वार्तया तरिष्यामस्-तावकैर्दुस्तरं(न्) तमः॥ 48॥**

त्वद्+ वार्तया, तावकैर्+ दुस्तरं(न्)

**स्मरन्तः(ख्) कीर्तयन्तस्ते, कृतानि गदितानि च।**
**गत्युत्स्मितेक्षणक्ष्वेलि, यन्नृलोकविडम्बनम्॥ 49॥**

कीर्तयन्+ तस्ते, गत्युत्+ स्मिते+ क्षण+ क्ष्वेलि, यन्+ नृलोक+ विडम्बनम्

**श्रीशुक उवाच**

**एवं(म्) विज्ञापितो राजन्, भगवान् देवकीसुतः।**
**एकान्तिनं(म्) प्रियं(म्) भृत्य-मुद्धवं(म्) समभाषत॥ 50॥**

मुद्+ धवं(म्)

**इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्)**
**सं(व्)हितायामेकादशस्कन्धे षष्ठोऽध्यायः।।**

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**
**ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।**

